RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.:
4-5, 19-20 of Every Month

॥ ओ३म् ॥
मणिर्लुठति पादाग्रे काचः शिरसि धार्यते ।
क्रयविक्रयवेलायां काचः काचो मणिर्मणिः॥
चाण. नी. द.- 15.9

सत्यमेव जयते नानृतं सत्येन पन्था
विततो देवयानः ।
येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्
सत्यस्य परमं निधानम् ॥
मांडूक्य उपनिषद् ( ३.१.६ )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
मृदुं वै मन्यते पापो
भाषमाणमशक्तिकम्।
जितमर्थं विजानीयात्
अबुधो मार्दवे सति ॥
( महाभारत, उद्योग पर्व - 4/6 )

मुक्तिमिच्छसि चेत्तात विषयान्
विषवत्त्यज।
क्षमार्जवदयातोषसत्यं
पीयूषवद्भज॥
अष्टावक्रगीता 1/2

卐 वर्षम्-१४ 卐 अंकः-०८ (३२०) नवदेहली 卐 १६ अक्टूबरमासः २०२४तः ३१ अक्टूबरमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-१२

## 'संस्कृत-पत्रकारिता' विषयिणी द्विदिवसीया राष्ट्रिया-संगोष्ठी-सम्पन्ना

-डॉ विमलेन्दु कुमार त्रिपाठी

केन्द्रीय-संस्कृत-विश्वविद्यालयस्य (नवदेहलीस्थस्य) आर्थिकसहयोगेन 'संस्कृत-संवादः' पाक्षिक-संस्कृतसमाचारपत्रस्य तथा संस्कृत-विभागः, राजधानीमहाविद्यालयः इत्यनयोः संयुक्ततत्त्वावधानेन 'संस्कृत-पत्रकारिता' विषयमुमवलम्ब्य द्विदिवसीया-राष्ट्रिया-शोध-संगोष्ठी 5-6 अक्टूबरमासे 2024 समायोजिता। चतुरसत्रात्मकसंगोष्ठ्यामस्यां नैके विद्वांसःआचार्याःपत्रकाराःसमागताः। उद्घाटनसत्रे आध्यक्ष्यं निर्वहन्तःपद्मश्रियासमलंकृताः आचार्याः अभिराजराजेन्द्रमिश्र महाभागाः मुख्यातिथित्वं



लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतयःमुरलीमनोहरपाठक महोदयाः, सारस्वतातिथिरूपेण जवाहरलाल-नेहरू-विश्वविद्यालयस्य प्रोफेसर संतोषकुमारशुक्ल महोदयाः, विशिष्टातिथिरूपेण दिल्ली विश्वविद्यालयस्य अनुवर्ती-शिक्षा एवं विस्तार-विभागस्य अध्यक्षा: प्रोफेसर प्रकाशनारायणमहाभागाः, संस्कृत-पत्रकारिता विषय विशेषज्ञत्वेन प्रोफेसर लालाशंकरगयावाल महोदयाः, स्वागताध्यक्षरूपेण राजधानी महाविद्यालयस्य प्राचार्याः प्रोफेसर राजेशगिरि प्रभृतयः उपस्थिताःअभवन्। मंचस्थ आतिथिनां स्वागतं



तुलसीपादपप्रदानेन, अंगवस्त्रेण, संस्कृत-संवादस्य वर्षैक्यस्य समग्रमपिक्अंकप्रदानेन संस्कृत--संवादस्य प्रबन्धसम्पादकेन वेदप्रकाशशर्मणा एवं मंजुशर्मणा च समनुष्ठितम्।

तदनु स्वागतवचोभिःवाचिकं स्वागतमपि राजधानी-महाविद्यालयस्य प्राचार्येण प्रोफेसर राजेश गिरि महाभागैः व्याहृतम्। प्रथमसत्रेऽस्मिन् 'प्रत्नकीर्ति' षण्मासिकशोध पत्रिकायाःलोकार्पणमभूत्। सत्रेऽस्मिन् ष्संस्कृत-संवादष् समाचारपत्रद्वारा एका स्मारिका प्रकाशिता। तस्याः 'संस्कृत-संवाद स्मारिकायाः' लोकार्पणमपि मंचस्थैः अतिथिभिः कृतम्। प्रथमसत्रात्मकस्य कार्यक्रमस्य अध्क्षीयोद्बोधने अभिराजराजेन्द्रमिश्रमहोदयैः 'वैदिकसंवादे' संस्कृत-पत्रकारितायाः मूलं विवेचितमतैः उक्तं यत् पाश्चात्यसंस्कृतिसंवाहकैः भारतीयसंस्कृतेः दुष्प्रचारे बहु प्रयतितं तथापि तैःसाफल्यं नाधिगतम्। मुख्यातिथित्वं निर्वहद्भिःप्रोफेसर मुरली मनोहर पाठक महोदयैः अष्टाध्यायां पाणिनेः व्याकरणे च संस्कृत-पत्रकारितायाः स्रोतांसि अवाप्यन्ते इति विवेचितम्। तैः इदमपि उक्तं यत् रामायण-महाभारते संस्कृत-पत्रकारितायाःनैकान्युदाहरणानि समुपलभ्यन्ते। जवाहरलाल-नेहरू-विश्वविद्यालयस्य प्राच्यविद्यासंस्थानस्य प्रोफेसर संतोष कुमार शुक्ल महोदयैःसंस्कृत-पत्रकारिताविषये संस्कृतशास्त्रोद्धरणपूर्वकं तन्महत्त्वं प्रस्तुतम्। दिल्ली विश्वविद्यालयस्य प्रोफेसर प्रकाशनारायण महाभागाः संस्कृतस्य व्यापकत्वं गम्भीरत्वं च प्रकटितम्। तैः कथितं यत् सामाजेसंस्कृतनिहितत्त्वानां उपयोगिता कथं सिद्धयेत् तदर्थं संस्कृतज्ञैः प्रयतितव्यम्। सत्रस्यास्य संचालनं डॉ ऋषिराजपाठकमहोदयेनानुष्ठितम्।

शेषभागःपंचमपुटे

## कुलपतिः प्रो. श्रीनिवासवरखेड़ी 'गोस्वामी गिरधारी-लालेति संस्कृत-गौरव-पुरस्कारेण' सम्मानितौ

नई दिल्ली। केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली इत्यस्य कुलपतौ प्रो श्रीनिवास वरखेड़ीवर्ये अखिल भारतीय संस्कृत साहित्य सम्मेलनेन 'डा गोस्वामी गिरधारी लाल इति संस्कृत गौरव पुरस्कारेण सम्मानिते सति विश्वविद्यालय परिवारे प्रसन्नता विद्यते। अलंकरणाय अनेन संबंधित विविध परिसराः,आदर्श महाविद्यालयाः , शोध संस्थानानि संस्कृत अनुरागिणः च वर्धापनानि अयच्छन्। ध्यातव्यं यत् प्रो वरखेड़ी



एतत् सम्माननं तेन विहितानां संस्कृतस्य,भारतीय संस्कृतेः शैक्षणिक योगदानानां च कृते प्रदत्तमस्ति। प्रो मदनमोहनझा, कुलपतिः (छात्रकल्याणम्) कथितवान् यत् यदा कश्चित् सम्मानितो भवति। यदा न केवलं व्यक्तित्वस्य अपितु विद्वान् येन संस्थानेन सम्बद्धः। तदीयमपि सम्माननं वर्धते।

अलंकरणाय कुल सचिवः प्रो आर. जी. मुरलीकृष्णः, निदेशकः, प्रकाशनं प्रो काशीनाथन्यौपाने, परीक्षानियंत्रकः, प्रो पवनकुमारः ,डा पी. एम. गुप्ता, पुस्तकालयाध्यक्षः अथ च प्रो रत्नमोहनझा, निदेशक, मुक्तस्वाध्यायकेन्द्रम् इत्येभिरपि वर्धापनानि प्रदत्तानि। प्रो मधुकेश्वरभट्टः, निदेशकः, योजना ( केन्द्रीया) उक्तवान् यद् अलंकरण संस्कृत समवायाय गौरवस्य क्षणम्। एतद् अतिरिच्य अस्मिन् अवसरे अन्ये अधिकारिणः कर्मयोगिनः (कर्मचारिणः) अपि हार्दिकानि वर्धापनानि दत्तवन्तः । कार्यक्रमः श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य, दिल्लीपरिसरे आयोजितः मुख्यअतिथि रुपेण डा रमेशपोखरियालः,'निशंकः', पूर्व शिक्षामन्त्री ,भारतसर्वकारः, विश्वविद्यालयस्य पूर्व कुलपतिः प्रो रमेशपाण्डेयं समेत्य अन्ये गणमान्याः अतिथयोऽपि उपस्थिताः। अस्मिन् समारोहे संस्कृत क्षेत्रे योगदानदातृषु संस्कृत विदुषी प्रो मीराद्विवेदी, संस्कृतविभागः , देहलीविश्वविद्यालयः, युव विद्वान् डा.रामबदनपाण्डेयः, श्रीएकरसानन्दआदर्शसंस्कृतमहाविद्यालयः, प्रभारी प्राचार्य, मैनपुरी , उत्तरप्रदेशः क्रमशः डा श्रीमती शीलादीक्षितः- 'संस्कृतश्री' पुरस्कारेण संस्कृतभूषण पुरस्कारेण सम्मानिताः। अखिलभारतीयसंस्कृतसाहित्यसम्मेलन द्वारा भारतीय संस्कृतेः उत्थाने सराहनीय योगदान दातारः पुरस्कृताः कुलपति प्रो वरखेड़ी अस्य चयन समित्यै आयोजक समित्यै च एतत् पुरस्कार प्रदातुं धन्यवादं ज्ञापितवान् ।

## पूर्णोऽयं विश्वः योगमयः निर्मितः स्यादिति अस्माकं लक्ष्यम् - स्वामीरामदेवः

हरिद्वार। योग, आयुर्वेद स्वदेश इत्येभिः सम्बद्धम् आन्दोलनं विश्वव्यापित्वेन विनिर्मातुं पतंजलि योगपीठ तत्वाधाने समृद्ध ग्रामे 'मुख्य योग शिक्षक' शिविराणाम् आयोजनं जातम्। तत्र पतंजलियोग समितेः



मुख्यकेन्द्रीयप्रभारी स्वामीपरमार्थदेवः उपस्थितः तदीयदिङ्निर्देशने शिविरसमापनं जातम्। मध्यप्रदेश पूर्व-पश्चिम, महाराष्ट्र पूर्व-पश्चिम, मुम्बई, गोवा इत्येभ्यः स्थानेभ्यः प्रायः 500 सह-योग शिक्षकाः प्रतिभागम् अकुर्वन्। शिविरे सर्वे शिविरार्थिनः पतंजलि योगपीठस्य परमाध्यक्षात्स्वामिरामदेवात् महामंत्रिणः आचार्य बालकृष्णात् च आशीर्वादं प्राप्तवन्तः। इस अवसर पर स्वामिना उदीरितं यदस्माकं शेषभागःद्वितीयेपुटे

# उत्तरप्रदेशसंस्कृतसंस्थानद्वारा प्रतिमासं सञ्चाल्यमानायाः गृहे गृहे संस्कृतमिति योजनायाः सेप्टेम्बरमासीयं चक्रं सम्पन्नम्

लखनऊ (वार्ताहरो दिव्यरञ्जनः) तत्र प्रदेशस्य पञ्चाशज्जनपदेषु पञ्चाशता शिक्षकैः प्राथमिकविद्यालयेषु सामूदायिककेन्द्रेषु धार्मिकस्थलेषु च द्वादशदिनव्यापिनी सरलसंस्कृतभाषाशिक्षणकक्षा सञ्चालिता । तत्र




सहस्रसंख्यकाः शिक्षार्थिनः सहभागं कृतवन्तः। कक्षाः एताः एकादशदिनाङ्कतः समारब्धाः । मध्ये वृष्टिकारणेन अवकाशाः आसन् । सामूहिकसमापनेन आसां कक्षाणां समारोपः विहितः। कार्यालयीयपदाधिकारिषु निदेशकः विनय श्रीवास्तवः, प्रशासनिकः दिनेश मिश्रः, श्रीजगदानन्दझाः, योजनाप्रमुखः भगवानसिंहचौहानश्च।

समन्वयकेषु अनिलगौतमः, धीरज मैठाणी, दिव्यरञ्जनः, राधाशर्मा, निरीक्षकेषु च तावद्डॉ स्तुति गोस्वामी, महेंद्र मिश्रः, विष्णु कुमारः, सवितामौर्यः, शिवप्रतापमिश्रश्च मुख्यत्वं भजन्ते।

# बालभारतीपब्लिकविद्यालये समायोजितम् 'राष्ट्रीय -स्वच्छभारत-अभियानम्'

- सौरभः दे

एनटीपीसी दर्लिपालीस्थित बालभारतीपब्लिकविद्यालये 'राष्ट्रीय -स्वच्छ भारत अभियानम्' - आयोजितम्। कार्यक्रमे मुख्यातिथिः प्लांट एनटीपीसी, दार्लिपाली प्रमुखः श्री राम भजन मलिकः(HOP), तथा च सम्माननीया अतिथिः अभिलाशा लेडीज क्लब, एनटीपीसी दार्लिपाली अध्यक्षा सुश्री पूनम मलिक इति उपस्थितिः अभवत्।बाल भारती पब्लिक विद्यालयस्य सम्मानित प्राचार्य सुश्री नीरजा तिवारी, बीबीपीएस




दार्लिपाली शिक्षक-शिक्षिका च उपस्थितिः आसन्। पर्यावरणसंरक्षणस्य सामाजिकदायित्वस्य च विषये जागरूकतां प्रसारयितुं एषा उपक्रमः केन्द्रितः आसीत्। अभियानस्य भागत्वेन विद्यालयेन २०२४ तमस्य वर्षस्य अक्टोबर् मासस्य प्रथमे दिने सीआईएसएफ-कालोनी-मध्ये एकां रैली आयोजिता तथा च दर्लिपाली-ग्रामे छात्राः कर्मचारिणश्च उत्साहेन रैली-मध्ये भागं गृहीतवन्तः, तस्य उपयोगं मञ्चरूपेण स्वस्य स्वरं दातुं स्वच्छं परिवेशं स्थापयितुं प्रतिबद्धता। छात्राणां कृते उत्थापनस्य कृते एषा सभा प्रभावशालिनी माध्यमरूपेण कार्यं कृतवती। स्वच्छतायाः महत्त्वस्य विषये जागरूकता, स्वच्छवातावरणस्य स्थापनस्य आवश्यकता च। आयोजने नुक्काड् नाटकम् (स्ट्रीटप्ले) अपि आसीत्, यत् त्रीषु प्रमुखस्थानेषु प्रदर्शितम् आसीत्ः सीआईएसएफ कालोनी, डार्लिपाली ग्रामः, एनटीपीसी प्लाण्ट् गेट् च आकर्षकं रचनात्मकं च प्रदर्शनं कृत्वा छात्राः अपशिष्टप्रबन्धनम्, प्लास्टिकप्रदूषणम्, तथा च... स्वच्छतायाः महत्त्वं । नुक्काड नटक् प्रेक्षकान् मोहितं कृतवान्, मनोरञ्जकरूपेण तथापि प्रभावशालिनः प्रकारेण महत्त्वपूर्णसन्देशान् प्रदत्तवान्, प्रत्येकं प्रदर्शनस्य अनन्तरं छात्राः कर्मचारिणश्च प्रदर्शनक्षेत्रेषु परितः च द्रुतसफाई-अभियानं कृतवन्तः। एषा हस्तगतपद्धतिः न केवलं स्वच्छतायाः महत्त्वं प्रदर्शितवती अपितु स्थानीयसमुदायं स्वपरिसरस्य स्वच्छतां स्थापयितुं तत्कालं कार्यवाही कर्तुं प्रेरितवान्।

प्रथमपुटस्य शेषभागः **पूर्णोऽयं विश्वः योगमयः निर्मितः...**

लक्ष्यं योगः, आयुर्वेदः, स्वदेशी इत्येतान् प्रति समाजे व्याप्त भ्रान्तीः समाप्य पूर्ण विश्वो योगमयो भूयात्। स्वामी परमार्थदेवः कथितवान् यत् स्वामी संकल्प सिद्धये पतंजलियोगसमितिः, महिलापतंजलियोगसमितिः, भारत स्वाभिमान, युवाभारतं, पतंजलिकिसानसेवासमितिः, सोशलमीडिया ह्मो स्वाभिमान इत्यस्य च सर्वः कार्यकर्तागणो दृढ संकल्पः। इतः प्रशिक्षणं प्राप्य इमे योगशिक्षकाः स्वजिल्लायां प्राते वा निःशुल्कं योगस्य प्रशिक्षणं दास्यन्ति। शिविरे समये-समये अनेकान् विविध विषयान् आधृत्य विदुषां सान्निध्यं प्राप्तम्। अस्मिन् शिविरे भारतीय शिक्षापरिषद् कार्यकारीअध्यक्षः श्री एन.पी.सिंहः, महिलापतंजलि योग समितेः मुख्यकेन्द्रीयप्रभारी डॉ. साध्वीदेवप्रिया, मुख्यकेन्द्रीयप्रभारी भाईराकेश, युवाकेन्द्रीयप्रभारी स्वामीआदित्यदेवः स्वामीऋतदेवः इत्येते शिविरार्थिभ्यो प्रशिक्षणं प्रदत्तवन्तः।

# बालभारतीपब्लिकविद्यालये समायोजितः नवरात्रोत्सवः

- सौरभः दे

प्रतिवर्षमेवास्मिन् वत्सरे अपि अक्टोबरमासे पञ्चमे दिनाङ्के एनटीपीसी दार्लिपालीस्थित बालभारतीपब्लिकविद्यालये नवरात्रोत्सवः अतीव धूमधामेण आनन्देन च समायोजितः। आदिशक्त्युपसनानिमित्तं अयमुत्सवः आयोजितः। उत्सवस्य मुख्योद्देश्यम् आसीत् -

ॐ या देवी सर्वभूतेषू क्षान्ति रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।।




इत्यादीना मन्त्रेण छात्रान् मातृरूपेण स्थिता शक्तेः बोधः किञ्च वैज्ञानिककारणत्वम् । महोत्सवस्य आरम्भः एकेन विशेषप्रार्थनासभेन अभवत्, यस्य उद्देश्यं छात्राणां शक्तिस्वरूपमा दुर्गायाः नवीनरूपं नवरात्रिस्य आध्यात्मिकमहत्त्वं लक्षणं च अवगन्तुं तथा च यवबीजानां उत्पादनस्य वैज्ञानिकमहत्त्वस्य विषये अवगन्तुं कृतम् आसीत् । अस्मिन् अवसरे छात्राः दृश्यसामग्रीद्वारा नवरात्रिमहोत्सवसम्बद्धा देवीदुर्गायाः कथां संक्षेपेण व्याख्यातुं शक्नुवन्ति स्म, माँ दुर्गायाः मुखौटां निर्मातुं शक्नुवन्ति स्म, नवरात्रिमहोत्सवस्य दृश्यानि चित्रितानि कलाकृतयः निर्मातुं शक्नुवन्ति स्म, दण्डिया आनन्दं कर्तुं शक्नुवन्ति स्म अर्थात् दण्डियाकाष्ठानां कलात्मकं अलङ्कारं कुर्वन्ति स्म तथा च विविधाः कार्यक्रमाः आयोजनं कृतवन्तः यस्मिन् छात्राः उत्साहेन भागं गृहीतवन्तः तथा च महिषासुर मार्दिनी इत्यस्याः कथायाः आधारेण नृत्य-नाटकं अपि प्रस्तुतवन्तः। नवरात्रि उत्सवस्य अस्य आयोजनस्य विषये सम्बोधने विद्यालयस्य आदरणीया प्राचार्या श्रीमती नीरजा तिवारीः 'नवरात्रि उत्सवम्' इन्द्रियनिरोधस्य, आध्यात्मिकशक्तिसञ्चयस्य, अन्तःकरणस्य शुद्धीकरणस्य च महान् उत्सवः इति वर्णयित्वा छात्रान् आदरं कर्तुं शिक्षयति स्म भारतीयसंस्कृतेः आध्यात्मिकपरम्पराणां च प्रतीकाः दुर्गादेव्याः साहसात्, बलात्, धैर्यात् च प्रेरणाम् आदाय सः अस्मान् अस्माकं जीवने नैतिकतायाः, संयमस्य च अनुसरणं कर्तुं शिक्षयति स्म। अस्मिन् नवरात्रि-उत्सवे पारम्परिकवेषधारिणः छात्राः गरबा-नृत्येन, दण्डिया-वादनं च कृत्वा स्वकला-संस्कृतेः, धार्मिक-आस्थायाः च प्रदर्शनं कृतवन्तः, येन वातावरणम् अधिकं सजीवम् अभवत् ।

# कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये व्याख्यानमालाया

रामटेक। कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य शास्त्रविद्यागुरुकुलेन 10-10-24 दिनाङ्के शास्त्रदीपिकाङ्गत्वेन षोडशीव्याख्यानमाला समायोजि। अस्यां व्याख्यानमालायां केरलस्थ कालिकट



आदर्शसंस्कृतविद्यापीठस्य आचार्या सद्यः पुरस्कृतस्वर्णांगुलीयकाः डॉ पुष्करदेवपुजारीमहाभागाः मुख्यातिथित्वेन समागताः। ते च छात्रान् उद्दिश्य शास्त्राध्ययने काः समस्याः तासां च कः परिहारः इति मार्गदर्शनम् अकार्षुः। तथा च अस्य कार्यक्रमस्य अध्यक्षाः सम्मान्याः कुलगुरवः आचार्याः हरेरामत्रिपाठीमहाभागाः न्यायदर्शनस्य कथं सर्वशास्त्रोपयोगित्वं वर्तते इति प्रत्यपादयन्। छात्राश्च शास्त्राध्ययनेन नीरक्षीरविवेकिनः तीक्ष्णमतयः भवेयुः इत्यपि अवोचन्। अस्य कार्यक्रमस्य मार्गदर्शकः शास्त्रविद्यागुरुकुलस्य निर्देशकः आचार्यः राघवेन्द्रभट्टः तथा च आयोजकः आचार्यः सचिनद्विवेदी आसीत्।

# एयरइंडिया-वायुयानस्य सुरक्षितम् आकस्मिकं अवतरणं कारितम्

-आचार्यः छविरमणोऽयम्

एएक्सबी-६१३ इति संख्याकस्य एयरइंडिया-वायुयानस्य आकस्मिकम् अवतरणं सफलं जातम्। तमिलनाडुराज्यस्य त्रिचीनगरस्य अन्ताराष्ट्रीयविमानपत्तनात् संयुक्तारबामीरातदेशस्य शारजहाँनगरं प्रति गच्छतो वायुयानस्य सफलम् आपत्कालीनावतरणं जातम्। उक्तविमानस्य हाइड्रोलिक-प्रणाल्यां तकनीकी-विफलतायाः परिज्ञानान्तरं त्वरितं त्रिचीविमानपत्तने एव विमानस्य सुरक्षितम् आकस्मिकं




अवतरणं कारितम्। विमानेऽस्मिन् १४१ जनाः यात्रिणः आसन्। आकस्मिकावतरणात् पूर्वं विमानमिदं सार्ध द्विहोरापर्यन्तं आकाशे एवं उड्डीयमानम् आसीत्। आकस्मिकावतरणे त्रिचीविमानपत्तने उच्चसजगता आसीत्। सर्वाण्यपि रक्षणसंसाधनानि स्थापितानि आसन्। आकस्मिकावतरणस्य कृते बेली-अवतरणस्य विकल्पमपि स्थापितमासीत्। परं तस्य आवश्यकता नापतिता। ध्यातव्यमस्ति यत् विमानचालकसमूहस्य विवेकेन अस्य विमानस्य सुरक्षितम् आकस्मिकम् अवतरणं जातम्।

# पण्डितमोतीलालशास्त्रिस्मारकव्याख्यानम्

विंशतिशताब्द्यां वैदिकविज्ञानस्य महान् शास्त्रचिन्तकः पण्डितमोतीलालशास्त्री संस्कृतजगति सुविख्यात अस्ति। स राष्ट्रभाषायां शतपथब्राह्मणस्य उपनिषदः गीताविज्ञानभाष्यस्य अभिनवां व्याख्यां कृतवान् अस्ति। तस्य उपलब्धा सर्वा कृतिः श्रीशंकरशिक्षायतनस्य अन्तर्जालफलके विद्यतेतराम्। श्रीशंकरशिक्षायतनं प्रतिवर्षं तस्य मोतीलालशास्त्रिणः स्मारकं व्याख्यानं समायोजयति। अस्मिन् वर्षे सितम्बर मासस्य २८ तमे दिनांके शनिवासरे श्रीलाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य



वाचस्पति-सभागारे इदं व्याख्यानं सुसंपन्नं गतम्।

श्रीशंकरशिक्षायतनस्य वार्षिकोत्सवरूपेण इदं व्याख्यानं प्रतिवर्षं प्रचलति। व्याख्यानेऽस्मिन् ग्रन्थद्वयस्य लोकार्पणं समागतैः अतिथिवर्यैः सञ्जातम्। एकः ग्रन्थः आङ्लभाषायाम् 'वैदिक कन्सेप्ट आफ मेन एन्ड यूनिवर्स' अस्ति। अयं ग्रन्थः राष्ट्रपतिभवने महामहिमराष्ट्रपतेः डॉ. राजेन्द्रप्रसादस्य समक्षं पण्डितमोतीलालशास्त्रिणः व्याख्यनं १९५६ तमे खिष्टाब्देऽभूत। तस्य व्याख्यनस्य आंग्लानुवादः ऋषिकुमारमिश्रैः कृतः। पुनः विस्तृतं संस्करणं विद्यते ग्रन्थेऽस्मिन्। द्वितीयो ग्रन्थ अहोरात्रवादविमर्शः अस्ति। पण्डितमधुसूदनओझामहोदयस्य अहोरात्रवादस्य समीक्षारूपः ग्रन्थः अस्ति। उभौ ग्रन्थौ २०२४ तमे वर्षे डी. के. प्रिन्ट वर्ल्ड, दिल्लीतः प्रकाशितौ स्तः।

व्याख्यानेऽस्मिन् काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्या-धर्मविज्ञान-संकायस्य पूर्वसंकायाध्यक्षः आचार्यः कृष्णकान्तशर्मा इन्द्रविजयग्रन्थस्य समसामयिकं महत्त्वम् उद्घाटितवान्। स इन्द्रविजयस्य विविधं पक्षं समाश्रित्य अवोचद् यत् पण्डितमधुसूदनओझामहोदयः वेदे इतिहासं स्वीकरोति। अन्यः विद्वान् वेदे इतिहासं न स्वीकरोति। वेदे यदि इतिहासः स्यात् तर्हि वेदस्य नित्यता भङ्गं प्राप्नोति। ऋग्वेदे अनेकाः सूक्तयः सन्ति यत्र विविधा कथा अस्माभिः पठ्यते। इन्द्रविजयग्रन्थे इन्द्रः अस्माकं राष्ट्रस्य प्रथमो राजा आसीत्। इन्द्रम् आधारीकृत्य भारतवर्षस्य भूगोलस्य इतिहास्य उद्घाटनम् अत्र जायते।

विशिष्टातिथिरूपेण विराजमानः जगद्गुरु- रामानन्दाचार्य- राजस्थान-संस्कृत- विश्वविद्यालयस्य व्याकरण-विभागस्य आचार्यः राजधरमिश्रः अवोचद् यत् अयम् इन्द्रविजयः ग्रन्थः भारतवर्षस्य भौगोलिकीं सीमां निर्धायति। न केवलं भूगलस्य वर्णनम् इन्द्रविजये अस्ति अपितु भारवर्षस्य समग्रः इतिहासः श्रुतिप्रमाणप्रमाणितो विद्यतेतराम्। स भारतनामकरणस्य विविधं पक्षम् उद्घाटितवान्। भारतवर्षस्य चत्वारि नामानि सन्ति- भारतवर्षं, नाभिवर्षं, आर्षभवर्षं हैमवतवर्षं च। भारतनामकरणस्य अपि चत्वारि प्रमाणानि सन्ति। आग्नीध्रस्य पुत्रः नाभिः आसीत्, नाभेः पुत्रः ऋषभः, ऋषभस्य पुत्रः भरतः आसीत्। तन्नाम्ना भारतवर्षम्। दुष्यन्तस्य शकुन्तलस्य पुत्रः भरतः। तन्नाम्ना भारतवर्षम्। शतपथब्राह्मणे अग्निः भरतः, तन्नाम्ना भारतवर्षम्। भरणात् भारतम् इत्यपि व्युत्पत्तिः अवलोक्यते।

कार्यक्रमस्य आदौ जवाहरलालनेहरूविश्वविद्यालयस्य प्राच्यविद्याध्ययनसंस्थानस्य आचार्यः प्रो. सन्तोषकुमाशुक्लः समागतेभ्यः अतिथिभ्यः स्वागतवचनं प्रददौ। स दृढेन शब्देन उद्गोषयत् यत् अधुना संपूर्णे भारतवर्षे वैदिकविज्ञास्य प्रमुखं संस्थानं श्रीशंकरशिक्षायतनम् अस्ति। अस्य शिक्षायतनस्य प्रख्यातशिक्षाविद् ऋषिकुमारमिश्रः संस्थापकः अस्ति। मिश्रस्य गुरुः पण्डितमोतीलालशस्त्री, मोतीलालशास्त्रिणः गुरुः पण्डितमधुसूदनओझा आसीत् । अनया गुरुपरम्परया वैदिकविज्ञानस्य संप्रसाराय प्रचाराय बद्धपरिकरं श्रीशिक्षायतनम् अस्ति। इतिहासस्य द्विधा स्थितिः ग्रन्थे विद्यते। एकः इतिहासः सृष्टिपक्षम् उद्घाटयति। द्वितीयः पक्षः राज्ञः चरितवृत्तान्तं समुद्घाटयति। जगद्गुरुवैभवे ग्रन्थे स्वयं पण्डितमधुसूदनओझा लिखति स्म।

**यद्विश्वसृष्टेरितिवृत्तिमासीत् पुरातनं तद्धि पुराणमाहुः।**
**यच्चेतनानां नु नृणाम् चरित्रं पृथक् कृतं स्यात् स इहेतिहासः।।**

श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृत-विश्वविद्यालयस्य शैक्षणिकपीठाध्यक्षः प्रो. भागीरथनन्दः कार्यक्रमस्य अध्यक्षः आसीत्। स इन्द्रविजयस्य महत्त्वं निरूपयामास। स कथितवान् यत् वैदिककाले लौहपदार्थस्य आविष्कृतिः नासीत् । परन्तु प्रस्तरस्य उपलब्धता आसीत। इन्द्रस्य वज्रं प्रस्तरेण निर्मितम्, प्रस्तरशब्देन कठोरतमस्य पदार्थस्य ग्रहणम् अस्ति। कालिदासोऽपि रघुवंशे रघुचरिते रघोः अश्वः ईरानदेशतः आगतः। अनेन प्रमाणेन सिद्ध्यति यत् भारतस्य सीमा बहुविस्तृता आसीत्।

श्रीशंकरशिक्षायतनस्य न्यासी श्रीमान् आनन्दबोर्दिया समेषां कृते धन्यवादज्ञापनं कृतवान् एवं च स्वकीये उद्बोधने भारतस्य व्यापकचिन्तनस्य महत्त्वं निरूपयामास। यत्र भारतवर्षे वैदिककालतः ज्ञानस्य विधस्य पक्षस्य विकासः सञ्जातः। अस्माकं देशे शास्त्रचिन्तनस्य स्वतन्त्रता वर्तते।

व्याख्यानस्य प्रारम्भे श्रीलालबहादुरशास्त्रि- राष्ट्रियसंस्कृत-विश्वविद्यालयस्य आचार्यद्वयं प्रो. गोपालप्रसादशर्मा वैदिकं मङ्गलाचरणं प्रो. महानन्दझा लौकिकं मङ्गलाचरणं कृतवान। कार्यक्रमस्य सञ्चालनं जामिया मिलिया इस्लामिया विश्वविद्यालयस्य संस्कृतविभागस्य डॉ. मणिशंकरद्विवेदी अकरोत। व्याख्यानेऽस्मिन् दिल्लीविश्वविद्यालयस्य, जवाहरलालनेहरूविश्वविद्यालस्य, श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृत-विश्वविद्यालयस्य, जामियामिलियाइस्लामिया-विश्वविद्यालयस्य बहवः विद्वांसः शिक्षकाः शोधच्छात्राः संस्कृतानुरागिणः सोत्साहं भागं गृहीत्वा कार्यक्रमस्य साफल्ये महद्योगदानं अकुर्वन्।

# गुजरातराज्यस्थितेन श्रीसोमनाथसंस्कृतविश्वविद्यालयेन संस्कृच्छात्रेभ्यः समायोजिता अभूतपूर्वा कार्यशाला

– डॉ. राहुलकुमारझाः, संस्कृतटङ्कणम् अथ आशुलिपिः इत्येतस्याः त्रिदिवसीयायाः कार्यशालायाः उद्घाटनं गुजरातराज्यस्थिते श्रीसोमनाथसंस्कृतविश्वविद्यालये बृहस्पतिवासरे अभवत् । विश्वविद्यालयस्य वेदविभागेन एतस्याः त्रिदिवसीयायाः Sanskrit Typ-




ing & Short Hand इत्याख्यायाः राष्ट्रियकार्यशालायाः समायोजनं नवदिल्लीस्थितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य सञ्चाल्यमानायाः संस्कृतसंवर्धनयोजनायाः वित्तसहायतया कृतम्। उद्घाटनसत्रस्य आयोजनं १०.१०.२४ तमे दिनाङ्के ११.०० वादने अभवत्। । कार्यशालायाः उद्घाटनसत्रे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य यशस्विनः सम्माननीयाः च कुलपतयः प्रो.सुकान्तकुमारसेनापतिमहोदयाः आध्यक्ष्यं निरवहन्। मुख्यातिथिरूपेण दूरदर्शनसमाचारवाहिन्यां संस्कृतसम्पादकाः प्रवाचकाः च गवीशद्विवेदिमहोदयाः नवदिल्लीतः समुपस्थिताः आसन्। का.कुलसचिवाः प्रो.ललितपटेलमहोदयाः अनुस्नातकविभागाध्यक्षाः प्रो.विनोदकुमारझामहोदयाः, विश्वविद्यालयसञ्चालित-महाविद्यालयस्य प्राचार्याः डॉ.नरेन्द्रपण्ड्यामहोदयाः, मुख्यसंयोजकाः वेदविभागाध्यक्षाः डॉ. विपुलजादवमहोदयाः च एतस्मिन् उद्घाटनसत्रे वेदिकायां विराजमानाः आसन्।

अस्य उद्घाटनसत्रस्य प्रारम्भः वैदिकमङ्गलाचरणेन दीपप्रज्वालनेन च अभवत्। प्रास्ताविकं शाब्दिकस्वागतं वेदविभागाध्यक्षाः डॉ.विपुलजादवमहोदयाः कृतवन्तः। मुख्यातिथयः सम्पादकाः आचार्याः गवीशद्विवेदिमहोदयाः संस्कृतक्षेत्रीयं स्वकम् अनुभवं प्रस्तूय छात्रान् उदबोधयन। विश्वविद्यालयस्य का.कुलसचिवाः प्रो.ललितपटेलमहोदयाः संस्कृतटङ्कणविषये वृत्त्यवसाराणां विषये प्रतिभागिनां मार्गदर्शनं कृतवन्तः। विश्वविद्यालयस्य मान्याः कुलपतयः कार्यक्रमस्य च अध्यक्षाः प्रो.सुकान्तकुमारसेनापतिमहोदयाः स्वोद्बोधने वर्तमाने काले एतादृश्याः अभूतपूर्वायाः कार्यशालायाः उपयोगितां महत्त्वं च वर्णितवन्तः। विद्याविनययोः माहात्म्यम् अपि सरलकथामाध्यमेन प्रबोधितवन्तः। अस्य उद्घाटनसत्रस्य सञ्चालनं संयोजकेषु अन्यतमः अथ वेदविभागीयः सहायकाचार्यः डॉ. राहुलकुमारझामहोदयः कृतवान् तथा आभारज्ञापनं दर्शनविभागाध्यक्षा डॉ. उमामहेश्वरीमहोदया कृतवती। अस्याः कार्यशालायाः संयोजकाः डॉ. विपुलजादवः, डॉ.राहुलकुमारझा, डॉ.हेमन्तपटेलः, श्रीअभिलाषमहापात्रः च आसन्। कार्यशालायां सप्तत्यधिकाः संस्कृतच्छात्राः प्रतिभागिनः सन्ति इति विशेषः।


## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।**

**वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**


# शिवशक्तेः समन्वितसाधनया सर्वं प्राप्नोति निश्चितम् - डॉ.अरुणकुमारमिश्रः



डॉ.दिनेश चौबे ,उज्जयिनी

नवरात्रस्य शुभावसरे उज्जयिनीस्थस्य महर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य वेदविभागेन ५ अक्टोबर २०२४ तमे दिनाङ्के आभासीयपटलमाध्यमेन शारदीयनवरात्रस्य रहस्यम् इति विषये विशिष्टव्याख्यानस्य आयोजनं कृतम्। मुख्यवक्तृरुपेण उत्तराखण्ड-संस्कृतविश्वविद्यालयस्य वेद-पौरोहित्यविभागस्य प्रमुखः डॉ. अरुणकुमारमिश्रमहोदयः स्वउद्बोधने उक्तवान् यत् नवरात्रस्य नवदिनेषु दैवीयतत्वम् अन्यदिनानाम् अपेक्षया सहस्रगुणम् अधिकं सक्रियं भवति। अस्मिन् काले वायुमण्डले विशेषतया च उपाशकेषु दिव्यतत्त्वानां प्रसारणं भवति। विश्वे वर्तमानाः दुष्टशक्तयः च नश्यन्ति, एषः कालः आध्यात्मिक-वैज्ञानिकदृष्ट्या च अतीवमहत्त्वपूर्णः लाभप्रदः च वर्त्तते। सभायाः अध्यक्षः मान्यः कुलगुरुः प्रो.विजयकुमारसीजी महोदयः उक्तवान् यत् उपासनाबलेन अनादिकालात् भारतवर्षः शक्तिसिद्धयोश्च मुख्यकेन्द्रम् अस्ति। नवरात्रस्यवसरे देव्याः नवस्वरूपाणां साधना भवति। अस्मिन् कालखण्डे भक्ताः विशेषसाधनां कुर्वन्ति, शक्तेः आशीर्वादं च प्राप्नुवन्ति । भारतस्य प्रत्येकस्मिन् प्रदेशे भिन्नभिन्नरूपेण शक्तिपूजनं क्रियते। प्रस्ताविकभाषणं वेदविभागस्य अध्यक्षः डॉ. अखिलेशकुमारद्विवेदीमहोदयः प्रस्तुतवान् । स्वागतभाषणं डॉ. पतंजलिकुमारपाण्डेयवर्येण वैदिकाह्वानं डॉ. अंकितशांडिल्येन ,संचालनं च श्रीसत्यव्रतपाण्डेयेन विहितम् धन्यवादज्ञापनं श्रीप्रणवकश्यपः कृतवान्। कार्यक्रमे सर्वे विभागप्रमुखाः, शोधकर्तारः, छात्राः, अन्ये जिज्ञासुजनाः च आसन्। व्याख्यानं च श्रुतवन्तः।

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

साहित्यं समाजस्य दर्पणमुच्यते परंतु समाज निर्माणेऽपि साहित्यस्य महत् योगदानं विद्यते स साहित्यस्य मूले भाषा तिष्ठति भाषा अस्मत्संस्कृतेः परिचायिका। अस्माकं देशस्य संस्कृतेः परंपराणां च आधार संस्कृत भाषा मान्यते। अतः भारतीयसंस्कृतेः, परंपराणां, संस्कृत भाषायाश्च संवर्धनाय संस्कृत पत्रकारिता आवश्यकम् अंगं मान्यते। संस्कृत पत्रकारिता न केवलं देश कालस्य घटनानाम् उल्लेखं कुरुते अपितु वर्तमानमपि समृद्धं विगतेन परिचितं चापि कारयति। संस्कृत पत्रकारिता माध्यमेन राष्ट्रे न केवलं सामाजिक-सांस्कृतिक-नैतिक-धार्मिक चेतनाः आविर्भवति अपितु उज्ज्वल भविष्यस्य निर्माणमपि भवति। पत्रकारिता एका विधा या भाषा माध्यमेन स्वम् उद्देश्यं संपूरयति। देशस्य क्षेत्रीय भाषाः सञ्जीवितुमपि पत्रकारितायाः एकं योगदानं यत्र संस्कृत पत्रकारिता संस्कृत भाषया सह तदीयं साहित्यं प्रचारयितु स्वं दायित्वमपि निर्वहतिस कस्यचिद्देशस्य साहित्यं समृद्धं स्यात् तत् तदीयभाषायाः सर्वग्राहयितां समाश्रयते।

भारतवर्षे प्राचीन काले संस्कृतं लोक भाषा आसीत्। गुरुकुलीय शिक्षा केवलं अनेन माध्यमेनैव आसीत् स मानव जीवने उपयोगिनां ज्ञानस्य, विज्ञानस्य अन्येषां च विषयाणां शिक्षा संस्कृत भाषायाम् उपलब्धा इत्येषः उल्लेखः लक्षशः पांडुलिपिषु, शिलालेखेषु च अद्यापि उपलब्धः। संस्कृत पत्रकारिता एषां सूचना समाजस्य समक्षं प्रस्तोतुं माध्यमं विद्यते। अस्माकं देशे प्रायः 18 संस्कृत विश्वविद्यालयाः सन्ति। सहस्रं गुरुकुलानि च यानि पारंपरिक रूपेण शिक्षां ददति स्म। संस्कृत संवर्धनाय अनेकाः संस्थाः कार्यं कुर्वन्ति। परंतु संस्कृतं जन भाषा अथ च राष्ट्रभाषा निर्मातुं मार्गः अतीव कठिनं लक्ष्यते स वैश्वीकरणस्य स्पर्धायां यत्र पूर्ण विश्वः भारतीय संस्कृतिं संस्कृत भाषां च प्रति उत्सुकतया अग्रसितः। तत्र अस्मद् देशे भारते संस्कृतं प्रचारयितुं प्रसारयितुं च प्रयासाः नैव पर्याप्ताः विधीयन्ते। संस्कृत भाषां सामान्यजन भाषा विनिर्मातुं संस्कृत पत्रकारितां प्रति अग्रसितैः भवितव्यम्। एतत् उद्देश्यं संपूरयितुं संस्कृत संवाद पाक्षिक समाचार पत्र द्वारा देशस्य राजधान्यां देहल्यां गत सप्ताहे संस्कृत पत्रकारिताम् उद्दिश्य एका राष्ट्रिय संगोष्ठी आयोजिता। संगोष्ठ्यां संस्कृत विद्वद्भिः संस्कृत पत्रकारैश्च संस्कृत पत्रकारितायाः इतिहासं वर्तमानं भविष्यं च आलक्ष्य एकं गहनं मंथनं विहितम्। संस्कृत पत्रकारिता महत्वं आवश्यकतां च केन्द्रीकृत्य च सर्वे संस्कृत विद्वांसः संस्कृत पत्रकारितायाः भविष्यं उज्ज्वलमिति प्रत्यपादयन्स संस्कृत पत्रकारिता द्वारा संस्कृत संवादे मया स्वं राष्ट्रियं दायित्वं पारस्परिक व्यवहारश्चनिर्व्यूढः स भवतु तत् केंद्र सरकार द्वारा संस्कृत विद्वद्भ्यो राष्ट्रपति पुरस्कार स्थगनस्य प्रश्नः अथ च राष्ट्रिय संस्कृत संस्थानाय केंद्रीय विश्वविद्यालयस्य स्तरं दातुं मांग याञ्चा, करोना कॉले संस्कृत लेखानां, कवितानां माध्यमेन सामाजिक चेतना जागरणं च इत्येभिः संबद्धवार्ता प्रकाश्य दायित्व भावं निर्व्यूढम् स अद्य निर्विवाद सत्यमिदं यद् भारतं पुनः विश्व गुरुत्वेन प्रतिष्ठापयितुं संस्कृत भाषायाः मुख्य भूमिका संस्कृत पत्रकारिता इतोऽपि समृद्धा भवितुमर्हति।

भवदीया

सम्पादिका

॥ वेद वाणी ॥

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे॥
आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा।
अदुर्मङ्गलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे॥'

May you, bride and bridegroom, may you remain here together. May you never separate. Especially, you may lead and enjoy full life. May you remain in your own house and live in a spirit of contentment,joy and play with your children and grandchildren.'

The Rig Veda 85.42&43

**संकलन : एस.वासुदेव रावः**

# संस्कृत-पत्रकारितायाः ऐतिह्यं दैनिक-साप्ताहिक-पाक्षिक-संस्कृत-समाचार- पत्राणि च



डॉ. विमलेन्दु कुमार त्रिपाठी,
देवघरम्
Vimalendubhu@gmail.com

मानवजीवनमतीव विशिष्टमिति ज्ञायत एव निखिलमनुष्यैः। ईश्वरस्यसमग्रसृष्टेःअनुपमा रचना मनुजरूपेण राराजते। मानवस्यास्य ऐतिह्यं सांस्कृतिक-साहित्यिक-परम्पराञ्चावगन्तुं संस्कृतवाङ्मयस्य तन्निबद्धसाहित्यस्य परिशीलनमपरिहार्यम्। साहित्यस्य, साहित्ये उपनिबद्धविषयाणाञ्च लोके आलोकाय पत्र-पत्रिकादीनामावश्यकता परिलक्ष्यते।

अतएव न केवलमद्यतनीने युगे अपितु पुराकालाद् एव पत्रकारितायाः आवश्यकता सर्वविदिता वर्तते।

साहित्यस्य विविधविधासु पत्रकारिता भव्यैका नूतना दिव्या चास्ति विधा। पत्रकारितायां ज्ञान-विज्ञान-कला-दर्शन-राजनीति-समाज-शिल्प-साहित्यादि- विषयाणां वैशिष्ट्यं प्रतिपाद्यते। तत्सम्बद्धाः सूचनाश्च प्रकटीकरोति पत्रकारिता। ज्ञान-विज्ञानयोःविलक्षणविधायाःअस्याःसर्वप्रथमोल्लेखःवैदिकयुगाद् प्राप्यते। संस्कृतवाङ्मये वार्ताहरणम्, वृत्तसम्प्रेषणम्, संवादसचयः, उद्घोषणाज्ञापनम्, हस्ताक्षरांकनम्,सामंजस्यपत्रादिकमवाप्यते। पौराणिककाले महर्षिनारदः आदिपत्रकारत्वेनानुमीयते। वाल्मीकिरामायणे 'सुमुख' नामाख्यः गुप्तचरः श्रीरामं गुप्तसूचनां विज्ञापयति। महाभारतेऽपि संजयःदिव्यदृष्ट्या धृतराष्ट्रं कुरुक्षेत्रयुद्धं प्रत्यक्षं वर्णयति।

लौकिकसंस्कृतसाहित्ये महाकविकालिदासविरचिते प्रसिद्धे 'अभिज्ञानशाकुन्तलम्' -नामके नाटके प्रणयपत्रं लिखितवत्या शकुन्तलायाः मनोरमं चित्रं चित्रितमस्ति।प्रणयपत्रमिदं दुष्यन्त-विषयकमिति विद्वद्भिः विज्ञायते। तद्यथा-

**तव न जाने हृदयं मम पुनःकामो दिवाऽपि रात्रावपि।**
**निर्घृण तपति बलीयस्त्वयि वृत्तमनोरथान्यंगानि॥**

भारवि-विरचित 'किरातार्जुनीयम्'-नामाख्ये महाकाव्ये गुप्तचराणां चर्चाऽवाप्यते। तद्नु-

**क्रियासु युक्तैर्नृप चारचक्षुषो,**
**न वञ्चनीयाः प्रभवोऽनुजीविभिः।**
**अतोऽर्हसि क्षन्तुमसाधु साधु वा,**
**हितं मनोहर च दुर्लभं वचः॥**

**'अत्र चारचक्षुषः एव गुप्तचररूपेणावगम्यन्ते । चरन्तीति चराः चराःएव चाराः, चाराःएव चक्षूंषि येषां ते चारचक्षुषः।'** संस्कृत-पत्रकारितायाः प्रारम्भिकःइतिहासःअर्नेस्ट हास महोदयात् प्राप्यते। अयं जनः'ब्रिटिश-म्यूजियम' संरक्षिते- "Catalouge of sanskrit and Pali books in the British museu" पालिग्रन्थसूचीनिर्मितिसमये 1876 तमे वर्षे पत्रिकाणां सूचनां दत्तवान्। अनन्तरं मैक्समूलर महोदयः 1882 तमे वर्षे India what can it teach us नामके पुस्तके तदनु एल०डी०बर्नेट महोदयः अयमपि पुस्तकसूचीं निर्माय 1892 तमे वर्षे प्रकाश्यतामानीतवान्। भारते पत्रकारितायाः प्रारम्भः हिन्दी -भाषायाः लब्धचर्चितसाप्ताहिकपत्रम् 'उदन्तमार्तण्ड' रूपेणावगम्यते। पत्रस्यास्य प्रकाशनं 30 मई 1826 वर्षेतः प्रत्येकं मंगलवासरे श्रीजुगुलकिशोरशुक्ल महोदयानां सम्पादकत्वे जायमानमासीत्। समाचारपत्रस्यास्य मुखपृष्ठे समाचारमहत्त्वख्यापकं पद्यमिदमवाप्यते स्म।

**दिवाकान्तकान्तिं विना ध्वान्ततान्तम्।**
**न चाप्नोति तद्वज्जगत्यज्ञलोकः॥**

वर्तमानयुगीनसंस्कृतपत्रकारितायाः अभिप्रायःश्रव्य-पत्रकारितया गृह्यते। यस्याः सम्बन्धः आकाशवाण्या सह वर्तते।आकाशवाण्याः प्रारम्भिकःकालः इटली वास्तव्यस्य जी०मार्कोनी महोदयस्य 1895 तमे वर्षे (वायरलेस) -माध्यमेन ध्वनि संकेतादि प्रेषणे साफल्यतायामवलोक्यते। तदनु भारते 1921 तमे वर्षे मुम्बईनगर्यां (टाइम्स ऑफ इंडिया) डाकतारविभागसहयोगेन प्रथमसंगीतकार्यक्रमः प्रसारितः जातः। विधिवतरूपेण 'ऑल इंडिया रेडियो' इत्यस्य स्थापना 1936 तमे वर्षे अभवत्। वर्तमानसमये आकाशवाणी चतुर्विंशति भाषासु 146 बोलीषु कार्यक्रमं प्रस्तौति।

'दृश्यश्रव्योभयात्मकपत्रकारिता' यस्याः सम्बन्धःदूरदर्शनेन, 'मुद्रण-पत्रकारिता' यस्याः सम्बन्ध-पत्र-पत्रिकाभिःविज्ञायते। 'पत्रकारितायाः सम्बन्धःसूचनानां संकलनेन तदनु सम्पादनद्वारा प्रत्येकं पाठकाय सुलभतया उपलब्धतायां वर्तते। परन्तु सर्वाः सूचनाः समाचारत्वेनाङ्गी क्रियन्ते। पत्रकारैः काश्चनेव घटनाः , समस्याः केचन्चेव विचाराः समाचारत्वेन प्रस्तूयन्ते।क्वाऽपि घटना समाचारत्वेन तदैव स्वीक्रियते यदा तस्यां घटनायां नवीनता-जनरुचिः-निकटता-प्रभावोत्पादकादि गुणाः भवेयुः। समाचाराणां सम्पादने तथ्यपरकता-वस्तुपरकता-निष्पक्षता-सन्तुलनादि सिद्धान्तानामनुपालनमपरिहार्यमेव भवति। मुद्रणपत्रकारितामभिलक्ष्य संस्कृतपत्रकारितां चर्चयामश्चेत् संस्कृतवाङ्मयस्य प्रचार- प्रसारदृष्ट्या संस्कृतस्य विद्वद्भिः संस्कृतसमाचारपत्रस्याभिधानानि नैकरूपेण प्रदत्तानि। यथा-वृत्तान्तः, वार्ता, उदन्तः,वृत्त, श्रुति, संवादादि। समाचारपत्राणामेतेषां मूलमुद्देश्यं संस्कृतं जनसामान्या भाषा कथं भवेत्,तद् साहित्यस्य श्रीवृद्धिःसर्वतोभावेन कथं स्यादित्युररीकृत्य संस्कृतसमाचारपत्राणि प्रकाशितानि प्रकाश्यमानानि च सन्ति। समाचारपत्राणामेतेषां स्वरूपं दैनिक-साप्ताहिक-पाक्षिक-मासिक-द्वैमासिक-त्रैमासिक-चातुर्मासिक-षाण्मासिक-वार्षिकादि प्रकारेणोपलभ्यते। संस्कृतभाषायाः सर्वप्रथमं मासिकपत्रं 'काशीविद्यासुधानिधिः' वाराणसीतः 1जून 1866 वर्षात् प्रकाशितमभूत्। संस्कृतसमाचारपत्रमिदं 'पण्डितपत्रिका' नाम्नाऽपि व्यहयते स्म। संस्कृतपत्रेऽस्मिन् प्राचीन संचिका, नूतनसंचिका रूपेण प्रकाशित- प्रतीनामुल्लेखः पत्रिकायामवाप्यते। 1917 ईस्वीयवर्षाद् पत्रमिदमप्रकाश्यमानमस्ति। संस्कृत-पत्रकारिताक्षेत्रे पत्रस्यास्य विशिष्टमवदानमिति।

भारतीयविद्वत्सु प्रकाण्डपण्डितःअप्पाशास्त्री राशिवेडकरमहाभागः प्रथमतयासंस्कृतपत्रपत्रिकादीनां सूचनामथ च समीक्षां प्रारब्धवान्। 'संस्कृत-चन्द्रिका' नामाख्यायाःविश्रुतपत्रिकायाः सम्पादकत्वं न्यभालयतानेन पत्रकारितायां विशिष्टमवदानं दत्तम्। अस्याः पत्रिकायाः वर्षस्य प्रथमे अंके संस्कृतस्यान्यान्य पत्रिकाणां परिचयः, प्रकाशनक्षेत्रं, विषयः, समीक्षाश्च प्रकाश्यन्ते स्म। इदं सर्वमपि कार्यं अप्पाशास्त्रिमहोदयैः सम्पाद्यमानमासीत्। पण्डित अम्बिकादत्तव्यासविरचित शिवराजविजयस्य प्रथमतया प्रकाशनमस्यामेव संस्कृत-चन्द्रिकापत्रिकायामभवत्। संस्कृत-पत्रकारिताक्षेत्रे युगान्तकारी परिवर्तनं 'संस्कृतरत्नाकर' पत्रं संदधते।1904 वर्षाद् जयपुरनगरात् पत्रमिदं प्रकाश्यमानमासीत्। अस्य पत्रस्य नैके सम्पादकाःयेषु पण्डितगिरिधरशर्मा चतुर्वेद-पण्डित सूर्य नारायण शर्मा-भट्टमथुरानाथशास्त्रिणः । एवमेव सारस्वती -सुषमा-भारती-स्वरमंगला-दूर्वा-संस्कृत-मञ्जरी प्रभृतयः नैकाः पत्रिकाःसंस्कृतजगत् चमत्कृतं कुर्वन्ति।

**'संस्कृत भाषा में पत्र और पत्रिका'** शीर्षकेन 'सरस्वती' पत्रिकायां नवम्बर1927तमे वर्षे प्रकाशितेन आलेखेन गुरुप्रसादशास्त्रिमहोदयःविशिष्टं कार्यं सम्पादितवान्। संस्कृत-पत्रकारिताक्षेत्रे येषामवदानमासीत् तेष्वन्यतमाःश्रीदीनानाथशास्त्रिणः, एम. कृष्णामाचारियर-चिन्ताहरणचक्रवर्ति - वी.राघवन् - गणेशरामशर्मा -श्रीधरभास्करवर्णेकर प्रभृतयःविशेषेण उल्लेखनीयाः विद्यन्ते। संस्कृतपत्रिकायाः विषये 'संस्कृत-पत्रकारिता' इतिहासग्रन्थस्य लेखकानां श्रीरामगोपालमिश्रमहोदयानां कथनमवलोकनीयमस्ति-'संस्कृत पत्र-पत्रिकाओं का प्रकाशन स्वयं अभावों को आमन्त्रण देता है, परन्तु संस्कृत-सेवा परायण विद्वानों ने इस अयाचित सेवा को स्वीकार किया।'

**संस्कृत -दैनिकपत्राणां नामानि-**

१-जयन्ती २-संस्कृतिः- ३-सुधर्मा-४-सुनृतवादिनी ५-संस्कृत साकेत ६-संस्कृतम् ७-देववाणी

संस्कृतदैनिकपत्रेषु 'सुधर्मा' दैनिकपत्रं विशिष्टतामातनोति। 1970 ईस्वीय वर्षाद् मैसूरनगरात् पत्रमिदं प्रकाश्यमानमासीत्। वरदराज अयंगारमहोदयैः पत्रमिदं सम्पादितम्। पत्रस्यास्य प्रकाशनं रविवासरे न भवति स्म। पत्रेऽस्मिन् बालसाहित्यस्य प्राधान्यमासीत्। भारतीय स्वतंत्रता-आन्दोलने संस्कृतलेखकाः अग्रगण्याः तस्यैवोदाहरणं संस्कृतसाकेतपत्रम्।

संस्कृत-साकेत पत्रस्य 1920 तमे वर्षे आंग्लानां विरोधे प्रकाशनस्य निर्णयः अयोध्यावासिभिः विद्वद्भिःगृहीतः। तस्मिन्नेव समये महात्मागान्धिनः सत्याग्रहःप्रचल्यमानः आसीत्। पत्रस्यास्य प्रथमसम्पादकाः हनुमत् प्रसाद त्रिपाठी महोदयाःआसन्।

**संस्कृत-साप्ताहिक-पत्रिकाः-**

१-सुनृतवादिनी २-मंजूषा ३-सुरभारती ४-भवितव्यम् ५-वैजयन्ती ६-पण्डित-पत्रिका ७-भाषी ८-गाण्डीवम्।

**संस्कृत-पाक्षिक-पत्र-पत्रिकाः-**

१-विज्ञानचिन्तामणिः २-मंजुभाषिणी ३-विद्वन्मनोरञ्जिनी ४-अमरभारती ५-मित्रम् ६-सहस्रांशुः ७- वाङ्मयम्। ८-उच्छृंखलम् ९-भारतवाणी १०-संस्कृतवाणी ११-शारदा १२-संस्कृत-संवादः

अद्यत्वे बालसाहित्यमुद्दिश्य बहुचर्चा चर्च्यमाणाऽवलोक्यते परन्विदमवधेयमस्ति यत् शारदा-पाक्षिक-समाचारपत्रे 'बाल भरती' आन्तरभारती एवं शिशुभारती' इत्यादि स्तम्भेषु बालकानां कृते रचनाः सामग्रयःप्रकाश्यन्ते स्म। यथा वा-'प्रसारय संस्कृतध्वजम्। प्रताडय संस्कृतदुन्दुभिम्। प्रपूरय संस्कृतशंखम्। पठ संस्कृतम्। वद संस्कृतम्। लिख संस्कृतम्।'

एवम्प्रकारेण वक्तुं शक्यते यत् विगतनैकेभ्यः वर्षेभ्यःप्रकाश्यमानानि दैनिक-साप्ताहिक-पाक्षिकसंस्कृतसमाचारपत्राणि नैजैः समाचारैः भव्यकलेवरैः च प्रायशःसमस्तसंस्कृतजगत् चमत्कुर्वन्ति। वस्तुतः कस्यापि भाषायाःप्रचार-प्रसारे तत्साहित्यसम्बद्धपत्रपत्रिकायाः किमपि विशिष्टं स्थानं भवति । संस्कृतपत्रकारितायाः क्षेत्रे पत्राणामेतेषां वैशिष्ट्यं योगदानं च सर्वतोभावेन विवेचनीयं वर्णनीयं चास्ति।संस्कृतसमाचारपत्राणामानि समाचार- लेख-काव्य-समीक्षा-बालसाहित्य-टिप्पणी-स्तम्भादिभिः

प्रथमपुटस्य शेषभागः

# ‘संस्कृत-पत्रकारिता’ विषयिणी द्विदिवसीया राष्ट्रिया-संगोष्ठी-सम्पन्ना

‘संस्कृत-पत्रकारिता’ ‘संस्कृतपत्रकारसम्मेलनञ्चेति क्रमशः द्वितीय-तृतीयसत्रयोः संचालनं संस्कृत-संवाद पत्रिकायाः सम्पादकमण्डलसदस्येन डॉ विमलेन्दु कुमार त्रिपाठिना कृतम्। सत्रस्यास्य प्रारम्भे मांगलिकं पद्यं डॉ पंकज झा वर्येण प्रस्तुतम्।सत्रेऽस्मिन् मुख्यवक्तारःप्रोफेसर लालाशंकरगयावाल महोदयाःआसन्। तैःसंस्कृत-पत्रकारितायाःऐतिह्यं विस्तृतं व्याख्यातम्। तैःपत्रकारितायाः विषये प्रतिपादितं यत् अस्याःकार्यक्षेत्रं व्यापकं, विस्तृतं चास्ति। सत्रस्यास्य आध्यक्ष्यं निर्वहद्भिःडॉ रवीन्द्रकुमारदास महोदयैःपत्रकारितायाः प्रचार-प्रसारे बलं प्रदतम्। सत्रेऽस्मिन् शोधच्छात्रैःशोधपत्र-वाचनमपि कृतम्। पत्रकार-सम्मेलनात्मके तृतीये-सत्रे बरिष्ठपत्रकार :श्री उमेश जोशी, लालबहादुर शास्त्री विद्यापीठस्य प्रोफेसर कमलाभारद्वाज, ऋचाझा, निधि तिवारी, डॉ युवराजभट्टराई प्रभृतयःअनेके पत्रकाराः उपस्थिताः आसन्। नैजे उद्बोधने उमेशजोशी महोदयैः उक्तं यत् पत्रकारितायां शुद्धता भवेत् तदर्थं पत्रकारैः प्रयतितव्यम्। नैजे उद्बोधने ऋचाझा भाषिक -शुद्धता विषये बलं दत्तवती। प्रोफेसर कमलाभारद्वाज महोदया संस्कृत-संवाद पत्रकारितायाःप्रशंसां प्रस्तुतवती। उक्तवती च विगत एकादशवर्षेभ्यःप्रकाश्यमानं पत्रमिदं संस्कृत-पत्रकारिताक्षेत्रे महद्योगदानं प्रस्तौति।पत्रकारिताप्रकाशने नैकाःसमस्याःसमायान्ति तथापि पत्रमिदमनवरतं प्रकाश्यमानमस्ति। सत्रेऽस्मिन् धन्यवादज्ञापनं श्री वेदप्रकाश शर्मणा व्याहृतम्। चतुर्थे समापनसत्रे आध्यक्ष्यं पद्मश्रियासमलंकृतैः प्रोफेसर अभिराजराजेन्द्रमिश्रमहोदयैः न्यभालितम्। मुख्यातिथयः उत्तर-प्रदेश-संस्कृत-संस्थानस्य पूर्वाध्यक्षाःडॉ वाचस्पति मिश्र महोदयाःविशिष्टातिथयःसंस्कृत-शिक्षकसंघस्य अध्यक्षाःब्रजेश गौतम महोदयाः, डॉ विमलेन्दु कुमार त्रिपाठिनः स्वागताध्यक्षाः प्रोफेसर राजेशगिरि, संस्कृतसंवादस्य प्रबन्धसम्पादकाः वेदप्रकाश शर्माणः उपस्थिताः अभवन्। सत्रस्यास्य प्रारम्भः डॉ ऋषिराज पाठकवर्यस्य लौकिकमंगलाचरणेनाभूत्। सत्रेऽस्मिन् नैजे उद्बोधने डॉ वाचस्पति मिश्र महोदयैः कथितं यत् प्रायशः सर्वैरपि संस्कृतज्ञैः नैजे गृहे एकं संस्कृतसमाचारपत्रमवश्यं ग्राह्यम्। समाचारपत्रप्रकाशने नैजः सहयोगश्च प्रदेयः।

सत्रेऽस्मिन् युवकवि ईशानविरचित ‘ईशानशतकम्’ काव्यस्य तथा चित्रसेन तिवारी प्रणीतस्य ‘बालप्रहसनम्’ नामापुस्तकस्य लोकार्पणमपि अभवत्। अस्मिन्नेव सत्रे श्री प्रेम शंकरशर्मणा विरचित ‘श्रीमदब्दुलकलामचरितम्’ काव्यस्य लोकार्पणमपि जातम्। स्वागतं राजधानी कॉलेज प्राचार्येण प्रोफेसर राजेशगिरिणा समनुष्ठितं। धन्यवाद वचांसि संस्कृसंवादस्य प्रबन्ध सम्पादकेन वेदप्रकाशशर्मणा समुपस्थापितानि। अस्यसमापनसत्रस्य संचालनं डॉ अरविन्द कुमार तिवारिणा कृतम्। सम्पूर्णेऽपि कार्यक्रमे ये उपस्थिताः तेषु डॉ अनिरुद्ध ओझा,श्री चित्रसेन तिवारी, डॉ सुदीप कुमार पाठकः, श्री सुमन कुमार मिश्रः डॉ ईशान तिवारी, श्रीमती चन्दा पाल प्रभृतयः आसन्।


अतिथिभिः सह प्रबन्धसम्पादकाः, राजधानी महाविद्यालयस्य प्राचार्याः, महाविद्यालयस्य अन्ये सदस्याः


प्रत्नकीर्ति-पत्रिकायाः उद्घाटनसत्रे लोकार्पणम्


बाल-प्रहसनम् पुस्तकलोकार्पणम्


‘श्रीमदब्दुलकलामचरितम्’ काव्यस्य लोकार्पणम्


समापनसत्रस्य मचस्थाः अतिथयः चित्राणि च


शोधपत्रवाचनं तथा संस्कृत-पत्रकार-सम्मेलने अतिथयः, संचालकः डॉ विमलेन्दु कुमार त्रिपाठी



संस्कृत-संवादस्य प्रबन्धसम्पादिका मञ्जु शर्मा


राजधानी महाविद्यालयस्य प्राचार्यः संस्कृत-संवादस्य सम्पादकाः वेदप्रकाश शर्मा एवं मञ्जु शर्मा

# एवमनेक-संज्ञाभिर्देव्यः पूज्यन्ते चोत्कले



प्रो. बनमाली बिश्वालः

नवरात्रे च देवीनां दर्शनं पुण्यकारकम्।
देवीदर्शनयोगश्च क्वचित् पुण्येन लभ्यते॥
विमलाया महाष्टम्यां श्रीमन्दिरे च दर्शनम्।
दर्शनं भुवनेश्वर्याः मंगलायाः क्वचित्पुनः॥
साग्रजायास्सुभद्रायाः महालक्ष्म्याश्च दर्शनम्।
देवीनामपि चान्यासां सरस्वत्या समं क्वचित्॥
चतुष्पथेषु दुर्गायाश्श्रीक्षेत्रे भव्यदर्शनम्।
चण्ड्याः काल्याश्च भैरव्या भगवत्याः क्वचित्पुनः॥
चण्ड्या नैकविधम्रूपमुत्कले परिपूज्यते।
हरचण्डी रणे चण्डी वालिचण्डी च कुत्रचित्॥
कटके मन्दिरं चण्ड्याः प्रसिद्ध्यति पुरातनम्।
प्रतिमा कृष्णमय्यस्ति चतुर्भुजैस्समन्विता॥
हस्तेंकुशस्तथा पाशो वरदाभयदौ करौ।
नानालंकारयुक्ता सा मुण्डमालसुशोभिता॥
काठजोडिनदीवातैः प्रफुल्लिता च सर्वदा।
क्षणे रुष्टा क्षणे तुष्टा लोककल्याणकारिणी॥
दुष्टसंहारिणी माता दुःखकष्टनिवारिणी।
भक्तेभ्यो वरदात्री सा सज्जनेभ्योभयं सदा॥
उत्कले शक्तिपीठेषु विरजोपि प्रसिद्ध्यति।
शारदा सारला तारा तारिणी बाटमंगला॥
हिंगुलाई क्वचिन्माता जागुलाई क्वचित्पुनः।
क्षेत्रेषु क्षेत्रनाम्ना सा यथा वै समलेश्वरी॥
एवमनेक-संज्ञाभिर्देव्यः पूज्यन्ते चोत्कले।
नामग्रहणमात्रेण नवरात्रं फलप्रदम्॥

## अथ नवपुष्पाञ्जलि-स्तोत्रम्



डॉ.शशिकान्ततिवारीशशिधरः

शिशुयुववृद्धसुपूजितसिद्धकवीशविगीतनगेशसुते!
हरिहरसेवितनरमुनिवन्दितराक्षसवृन्दविनाशरते!।
भवभयभञ्जिनि नगपतिनन्दिनि भक्तविमोहिनि!मोदरते!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!॥01॥

गुरुजनबोधितभक्तसमर्चितविश्वचमत्कृतचक्रधरे!
खलदलनाशिनि दुर्जनमारिणि राक्षसरक्तपिपासिनि हे!।
मतिगतिदायिनि सौख्यविधायिनि दिव्यपिनाकिनि रोषभरे!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!॥02॥

तिमिरविभायिनि निर्जरपायिनि बुधमतिवासिनि शुद्धमते!
बहुविधरूपिणि विश्वविमोहिनि!कष्टविदारिणि पूज्यवरे!।
निशिचरदण्डिनि भक्तविमानिनि शान्तसुरूपिणि खड्गधरे!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!॥03॥

सकलमनोरथसिद्धिविधायिनि संकटनाशिनि सिद्धरमे!
करधृतदिव्यकृपाणविपाटितदानवमुण्डविनाशरते!।
भवविषमायिनि शैलनिवासिनि सद्वरदायिनि गानभरे!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!॥04॥

रघुवरपूजितजानकिवन्दितकृष्णसमर्चितपूज्यतमे!
कलिमलनाशिनि भक्तनिवासिनि धर्मविकासिनि सत्यभरे!।
तव गुणगानरतोस्मि हृदा मम नाशय दुःखमहो! कमले!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!॥05॥

नहि जगतीह मनुष्यवरोत्र विना कृपया सुतरिष्यति ते
तव कृपयैव नरो निजलक्ष्यमहो सुखदं समवाप्स्यति हे!।
हर विपदस्स्वकभक्तवरस्य समुद्धर मामिह हे विमले!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!॥ 06॥

कुरु करुणेश्वरि हे ममतेश्वरि! नैजदयाम्मयि हे शिवदे!
चरणसरोजरतस्य सुभक्तवरस्य समस्तविपत्तिहरे!।
धनबलशून्यगतोस्मि महेश्वरि पाहि हरेश्वरि!कष्टहरे!
भव भव सम्मुदिता भवदेवि कुरुष्व दयां मयि मातृवरे!॥07॥

गगनधरानिलवह्निजलादिकभूतसुरक्षणसत्ययुते!
कविगणसिद्धमहात्मसुरोचितदिव्यगुणप्रभकान्तिवृते!।
शशिधरसेवितविष्णुविमोहितचन्द्रदिवाकरनेत्रयुते!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!॥08॥

नवपुष्पाञ्जलिस्तोत्रं यः पठेच्छ्रद्धया जनः।
श्रीदुर्गासम्प्रसादेन स भवेद्गुणवान्सुखी॥

# नवदुर्गास्तुतिः!!



-डॉ. अरविन्दकुमारतिवारी
परिकल्पकः,
अमरवाणीकविपरिषदः।

शैलपुत्रीं भजे।
शान्ता लोकविभाविता गिरिसुता नन्दिस्थिताऽनन्दिता
संसाररस्य हिताय पर्वतगृहं त्यक्त्वा स्वभक्तालयम्।
शिष्याशानवमङ्गलानि विकसत्प्रत्यग्रकाव्यार्चिता
माताऽस्मत्प्रतिभाविभावननुतातन्त्यतामागता।

मातरं ब्रह्मचारिणीं सेवे।
विकसत्काव्यपुष्पैर्या कविना प्रियसूनुना।
अर्च्यते सा भवेत् प्रीता जननी ब्रह्मचारिणी॥

मातरं चन्द्रघण्टां प्रणौमि।
दुर्जनान् घातयन्ती या सज्जनानवति प्रियान्।
चन्द्रघण्टा शुभा वन्द्या खलवृन्दविदारिणी॥

मातरं कूष्माण्डां वन्दे।
अज्ञानं प्रसृतं कुलक्षणशतं दम्भं सदामानितां
पारुष्यं कटुकौतुकं कुजनतां चित्ताद्धरन्ती द्रुतम्।
कूष्माण्डे जननि ध्रुवं भर हृद:कोषे गुणानुज्ज्वलान्
कञ्चिन्मां तनयं महेश्वरकृपापात्रीकुरुष्वानतम्॥

स्कन्दमातरं स्तौमि।
खेलन्तं गिरिकन्दरासु सुमुखं दूरं कुटीराद्गतं
सूनो! मोदकमस्ति मे करयुगे श्रुत्वा कुमारो ध्वनिम्।
आविष्कृत्य गणेशरूपमभुनग् दृष्ट्वा गणेशं ततो
याभूत् प्रीततराद्रिजा भगवती स्कन्दान्वितां तां नुमः॥

मातरं कात्यायनीं स्तवीमि।
काचित्काव्यकलामयी बुधनुता क्रीडत्कवीशस्तुता
पश्यन्ती कविकौतुकं निवसतां भूप्राणिनां मातृका।
श्रीमच्छम्भुवधूर्गृहीतकृपणा लम्बोदराम्बा शुभा
कीर्तिं मे कलयेत्कवित्वमहितां कात्यायनी कामधुक्॥

मातरं कालरात्रिं स्तुवे।
यः कालरात्रिं नवरात्रकाले काव्यस्तवैः स्तौति कविः स कश्चित्।
भक्तो धनं कीर्तिलताप्रसूनं पदं प्रतिष्ठां लभतेऽरविन्दः॥

मातरं महागौरीं नौमि।
कया सृष्टोऽशिष्टो भुवि विगतलज्जो वद मृदा
खलो निन्दासक्तो जननि! महतामासनपदम्।
समारोढुं व्यग्रो गदति कटुवाचा गुणिगणं
स हेयो दीनात्मा कथमपि महागौरि! विलपेत्॥

मातरं सिद्धिदात्रीं नमामि!!
समक्षं यः शंसां कुरुत इव बन्धुर्विषगलः
परोक्षं रुक्षं ना वमति बहुधा वा रिपुसमः।
कृतघ्नं हे मातर्मदनदहनास्त्रेण दनुजं
गदाघातैर्दुष्टं कुरु विनयशीलं तमचिरम्॥

# उद्धारय जगदीश्वरि!



डॉ० निरञ्जन मिश्रः

चरणरजस्तव सकलविकारं हरति सदा भुवनेश्वरि!।
खलदलबद्धसुतस्य दशां तव पश्यति को जगदीश्वरि!॥1
लुप्ता विद्या श्रुतिरससिद्धा तमसा चन्द्रकलाद्य निबद्धा।
कुमुदकलाया नयनवारिदं पश्यति को भुवनेश्वरि!॥
खलदल..........॥2
वञ्चकतेयं विहसति मधुरं विलपति सज्जनतेयं सततम्।
कपटाच्छन्नतिमिरघनभित्तिं भेत्स्यति को जगदीश्वरि!॥
खलदल.............॥3
वचनभैरवस्तनुते लास्यं सद्व्यवहारो निवहति दास्यम्।
नग्नविवशता नीलं गगनं पश्यति हे जगदीश्वरि!॥
खलदल...........॥4
त्वमसि शरण्या त्रिभुवनधन्या मान्यानां मननीया मान्या।
त्वामपहाय दशां स्वां कस्मै कथयामि जगदीश्वरि!॥
खलदल............॥5
विगतसहायस्तव पदकमलं नमति सदा बद्ध्वा करयुगलम्।
जनगणतापनिवारणकारणमुपकल्पय जगदीश्वरि!॥
खलदल...........॥6
धरतु वामतां क्वचिदिह धाता प्रभवति नैव कुमाता माता।
विकलनिरञ्जनहृदयवेदनामुद्धारय जगदीश्वरि!।
खलदल..........॥7

## शुभं कामये

येन संतापितोऽहं सदा तर्जित-
स्तन्मुखस्य स्मितेस्सौभगं कामये।
तद्विलासेन या मद्दशा दृश्यते
सा तदीया भवेनेति सम्प्रार्थये॥1
वाणसंधानमेवास्ति तत्कौशलं
घातितस्य व्यथां नैव जानाति सः।
सा कदाचिन्न तस्याननं धर्षयेत
तत्कृते शंकरं शंकरं कामये॥2
यत्प्रसादादियं संगिणी मे व्यथा
मन्मनोमर्दने तन्मनोरञ्जने।
संगता सा कदाचित्तदीयांगनं
न व्रजेदित्थमेव प्रियं कामये॥3
कस्यचिन्मद्व्रणेनापि चेन्मंगलं
जीवनं धन्यमेतद् विजानाम्यहम्।
यैन केनापि मज्जीवनेनैव त-
न्मानसे वारिजस्योद्भवं कामये॥4
तन्मनोमार्दवं चापि जानाम्यहं
वातघातोऽपि चेत् कौलिशं घातनम्।
वालिशो मोदतां मद्व्रणस्यांकनै-
न व्रणं तत्कृते सम्भवेत् कामये॥5
मत्सुखं यत्कृते मोददा नाभवत
स्यात्तदर्थं दशा मे शुभाशंसिनी।
सिञ्चितो यः कदाचिच्छुभाशंसनै-
तन्मनोलास्यरोधं कथं कामये॥6

# नवदुर्गा-स्तवनम्



डा. अम्बरीशकुमारमिश्रः
(सहायकप्राचार्यः)
भरतमिश्रसंस्कृतमहाविद्यालय, छपरा (बिहार)

भक्तानां भयहारिणीं सुखवहां क्लेशापहां बुद्धिदां,
दैत्यानां मदमर्दिनीं सुखनिहां क्लेशापदामोहदां।
दुष्टानां पतितप्रलिप्तमनसां नृष्णां शिरोभञ्जिकां,
वन्दे शैलसुतांप्रमोदजनिकामादिस्वरूपां सदा1
ब्रह्मेशानगजेन्द्रनाथ-महितामानन्दनन्दात्मजां,
जाड्यालस्यमदान्धकारकुटिलव्यापारमोहदाहाम्।
सूर्येन्द्राग्न्यनिलेन्दुपूजितपदां दुःखाब्धिपारावहां,
वन्दे सारदब्रह्मचारिवरदां रूपद्वितीयां सदा2
चन्द्राभामुखमण्डलां शशिकलाश्वेतांशुकाभास्वरां,
चन्द्रस्येव कराविन्दनिचये चक्राब्जशङ्खावहाम्।
चन्द्रालक्ष्मविभूषितावब्जचरणां देवासुरैर्वन्दितां,
तार्तीयां सुखरूपिणीं भजत रे श्रीचन्द्रघण्टाऽभिधाम्3
ब्रह्माण्डोदरभाण्डताण्डवरतां चण्डादिरक्षोदराम्,
मुण्डाभारशिरोधरां दशभुजां दण्डप्रदां कामदाम्।
पण्डाखण्डविवर्धिकायुधकरां तुण्डारविन्दच्छटाम्,
काशीस्थां नवतूर्यदिव्यशुभदां कूष्माण्डरूपां भजे4
आनन्दप्रचयामनन्दजनिकां नन्दाङ्गनाब्जाननाम्,
नन्दीशप्रणयस्वरूपरुचिरां कन्दारविन्दांशुकाम्।
छन्दोगानरताभिरूपमतिदां प्राणप्रदोत्पत्तिकां,
स्कन्दाम्बां भज पञ्चमांजमते जाड्यान्धदोषापहाम्5
पुष्टिं सम्प्रददाति भक्तवपुषे तुष्टिन्तु तन्मानसे,
रुष्टिं पापवदात्मने जयचयैर्धृष्टिर्जनैरुच्यते।
जुष्टिं पादमहोत्पलस्य कुरुतेऽभीष्टं सदावाप्यते,
षष्ठं रूपमहो समस्तुतिपरं कात्यायनी स्मर्यते6
कालः स्पन्दति चेष्टितेन भृकुटेः वायुस्तथा वाति रे,
शीतत्वं सलिले हिमे शशधरे नैदाघभावोऽनले।
सूर्यो भाति कवित्वमुत्पतति या सर्वेष्टसिद्धिप्रदा,
रूपं सप्तममम्बिकां भगवतीं तां कालरात्रिं जुषे7
जीमूतात्मजदेविशम्भुहृदये श्रीभास्यमाता रमे,
जीवानां जनिपालनान्तनिलये श्रीकार्तिकेयात्मजे।
सिंहारूढदयार्द्रभावभरिते स्वर्णादिभिर्भूषिते,
रूपञ्चाष्टममद्भुतं शिवमहागौरि त्वदीयं भजे8
बुद्धिं वाञ्छसि काव्यकर्मनिपुणांश्रीसिद्धिदात्रीं सर,
शुद्धिश्चेन्निजशेमुषीसुविमले श्रीसिद्धिदात्रीं चर।
ऋद्धिं यक्षसमां समेष्टशुभदां श्रीसिद्धिदात्रीं धर,
सिद्धिञ्चेन्नवमीं स्वरूपरुचिरां श्रीसिद्धिदात्रीं स्मर9
समतोषकरी जनपोषकरी, जडताविपदाक्षणमोषकरी।
नृतमित्रमहोऽनृतनिन्द्यकरी विजयादशमीनवसिद्धिकरी।

# इन्द्रविजयग्रन्थे विज्ञानभवनस्य महत्त्वम्

–डॉ. लक्ष्मीकान्तविमलः

नवदेहली। श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन सितम्बरमासस्य ३०तमे दिनांके सायंकाले ५ वादनतः ७ वादनपर्यन्तम् अन्तर्जालीयमाध्यमेन एका राष्ट्रिया संगोष्ठी समायोजिता। पण्डितमधुसूदनओझामहोदस्य इन्द्रविजयस्य तृतीयाध्यायस्य विविधविषयं चाधारीकृत्य इयं राष्ट्रिया संगोष्ठी प्रवर्तिता।

दिल्लीविश्वविद्यालयस्य हंसराजमहाविद्यालयस्य संस्कृतविभागस्य आचार्यः प्रो. रञ्जीतकुमारमिश्रमहोदयः अकथयत् यद् इन्द्रविजयस्य तृतीयाध्याये उषसः विविधं स्वरूपम् उद्घाटितं विद्यते। उषसः स्तुतिकर्तारः



बहवः ऋषयः सन्ति। येषां नामानि ग्रन्थकृद्भिः उल्लिखितानि सन्ति। यथा- विश्वामित्रः, वसिष्ठः, प्रस्कण्वः काण्वः, कक्षीवान् दीर्घतमा, अष्टादंष्ट्रः वैरूपः, आप्त्यः च एते ऋषयः ऋग्वेदे उषसं स्तुवन्ति। उषसः मनुष्यरूपस्य स्थापनम् अस्ति तथापि आधिदैविकवद् व्यवहारः भवति। सूर्योदयकालतः हिरण्यमये रथे उषा समारुह्य मनुष्यं पार्श्वम् आगच्छति। देवसञ्चालिताः शतं रथाः उषसः पृष्ठभागे चलन्ति।

**सूर्योदयादेव रथं हिरण्मयं सारुह्य दूरानभियाति मानुषान् ।**
**अध्यासितं तत्सहचारि दैवतैः शतं रथानामनुयापि पृष्ठतः।।** इन्द्रविजयः पृ. ३६९, का.१

ऋषिः वसिष्ठः राज्ञः वरुणस्य पुरोहितः आसीत्। सूर्यभवने तस्य वसिष्ठस्य नियुक्तिः सञ्जाता। स ऋषि उषसं स्तौति। ऋग्वेदस्य सन्दर्भितमण्डले उषसः विशदव्याख्या अवलोक्यते।

केन्द्रीय-संस्कृत-विश्वविद्यालयस्य वेदव्यासपरिसरस्य व्याकरणविभागस्य सहायकः आचार्यः डॉ. गोविन्दशुक्ल-महोदयः अकथयत् यद् इन्द्रविजयग्रन्थस्य तृतीयाध्यायस्य नाम विज्ञानभवनम् अस्ति। अस्मिन् अध्याये सूर्यसदनस्य संस्थापनस्य महती चर्चा ग्रन्थकृद्भिः विहिता। नदीनां नामोल्लेखेन स्थानस्य परिचयः अत्र समुपलभ्यते। यथा काश्मीरतः उत्तरदिशायां बिन्दुसारनामकः सरोवरः विद्यते। स सरोवरः अधुना 'सरपस' इति नाम्ना विज्ञायते। कश्चित् तं सरोवरं सरस्वतीनाम्ना व्याख्यायते।

**काश्मीरादुत्तरतो बिन्दुसरस्तत्सरीकुलेत्युक्तम्।**
**'सरपस' नाम च तस्मात् सरस्वतीत्याहुरन्ये तु।।** तत्रैव, पृ. ३४४, का. ७

सिन्धुनद्याः सङ्गमस्थलात् पूर्वतटभागे पश्चिमतटभागे सरस्वती नगरी आसीत। तत्रैव सूर्यस्य सदनं संस्थापितम्।

**सिन्धोः सङ्गमदेशे तस्या वामे च दक्षिणे च तटे ।**
**यासीत्सरस्वती पूस्तस्यां सूर्यप्रतिष्ठाऽऽसीत्।।** तत्रैव, पृ. ३४६, का.८

हरियाणा-संस्कृत-विद्यापीठस्य साहित्यविभागस्य सहायकः आचार्यः डॉ. राधावल्लभशर्ममहोदयः अकथयत् यद् इन्द्रविजयग्रन्थस्य सूर्यसंस्थनस्य विस्तारेण चर्चा विद्यते। तत्र सूर्यस्य चक्रद्वयम् आसीत्। एकं चक्रं द्युलोके संस्थापयितुं दस्युतः इन्द्रः स्वीकृतवान् । कुत्सस्य समीपे चक्रं रक्षितवान्।

**ये द्वे चक्रे सूर्यस्तत्रैकं दिवि समाधातुम् ।**
**दस्योः शङ्कित इन्द्रो हत्वाऽन्यत् कुत्सरक्षणे न्यदधात् ।।** तत्रैव पृ. ३८९, का. १

अत्र विष्टपस्य वर्णनक्रमे ग्रन्थकारः पण्डितमधुसूदनओझामहोदयः विष्टपत्रयस्य उल्लेखं कृतवान्। विष्टपस्य अर्थः स्वर्गः अस्ति। अपराजितास्थाने ईशानदिशायां चन्द्रस्य विष्टपः आसीत्। दक्षिणदिशायां ब्रह्मणः विष्टपः एवं च उत्तरदिशायां विष्णोः विष्टपः आसीत। अत्र भारतीयभूगोलस्य निदर्शनम् अस्माभिः दृश्यते।

**स्वर्गस्त्रिविष्टपाख्यो विष्टपमेतस्य मण्डलं खण्डम् ।**
**ऐशान्यामपराजितदिशि चौन्द्रं विष्टपं त्वासीत्।**
**प्राग्मेरुलक्षित तु ब्राह्मं विष्टपमवाग् दिशि प्रथितम्।**
**तत उत्तरदिक्प्रथितं नाकारब्धं विष्टपं विष्णोः।।** तत्रव पृ. ३९६, का १

जवाहरलाल-नेहरू-विश्वविद्यालयस्य संस्कृत-एवं-प्राच्यविद्या-अध्ययन-संस्थानस्य आचार्यः प्रो. सन्तोषकुमारशुक्लवर्यः कार्यक्रमस्य अध्यक्षः आसीत्। तेन कथितं यत् तृतीयाध्याये सूर्यभवनस्य अपूर्वा व्याख्या इन्द्रविजयग्रन्थेऽस्मिन् विद्यते । तृतीयाध्याये सूर्यस्य विद्यायाः उषसः विद्यायाः विशदेन वर्णनं जातम्। आदौ एव ग्रन्थकारः लिखति यत्- सरस्वतीनद्याः तटे सूर्यसदनं संस्थापितम् इन्द्रेण। अस्य सूर्यसदनस्य संस्थापनं वसिष्ठस्य ऋषेः आध्यक्षेऽभूत्। सूर्यस्य ज्योतिः उषसः विद्यां विज्ञातुं सूर्यसदनं चासीत्।

**वेत्तुं वसिष्ठमुख्याः सूर्यस्य गवां तथोषसो विद्याम् ।**
**चक्रे सूर्यं नामाधिष्ठानं प्राक् सरस्वतीकूले।।** तत्रैव पृ. ३४५, का.२

मणिपुरराज्यस्य धर्मोदयवेदविज्ञानगुरुकुलस्य सामवेदस्य प्राध्यापकः डॉ. प्रवीणकोईरालामहोदय सस्वरं वैदिकमङ्गलाचरणं कृतवान् कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमलः कृतवान् । अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्य महाविद्यालस्य आचार्याः शोधच्छात्राः विषायानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्रुः।

## गांधीवर्येण अहिंसा सत्यबलेन च देशः स्वतन्त्रः कारितः-कुलगुरुः प्रो.विजयकुमारः सीजी

डॉ. दिनेश चौबे, उज्जयिनी

अन्ताराष्ट्रिय - अहिंसादिवसः गान्धीजयन्तीं च परिलक्ष्य 2अक्टूबर 2024 तमे दिनाङ्के उज्जयिनीस्थस्यमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य योगेश्वरश्रीकृष्णभवने प्रातः 11 वादने




राष्ट्रीयसेवायोजना एनसीसी-इकाई इत्यस्य च संयुक्ततत्तावधाने विशिष्टव्याख्यानस्य आयोजनं जातम् आसीत् ।मुख्यवक्त्रीरूपेण नगरस्य शासकीयविधिमहाविद्यालयस्य प्राचार्यः डॉ.अरुणासेठीमहोदया उक्तवती यत् महात्मागान्धी समतायाः, सत्यस्य, अहिंसायाः च उपरि आश्रितः आसीत् । तस्य आदर्शाः उच्चनीतिं सरलजीवनं च उपदिशन्ति । गांधीवर्यः राष्ट्रस्य नायकः स्वतन्त्रता आंदोलनस्य च प्रेरकः अस्ति। सभाध्यक्षः मान्यः कुलगुरुः प्रो.विजयकुमारसीजी महोदयः उक्तवान् यत् गान्धिवर्यस्य सत्याग्रहमन्त्रः शान्तिः, मानवाधिकारः, स्थायिविकासस्य नीति च देशस्य सर्वविध हितं च कर्तुं समर्थाः। तस्य मतम् आसीत् यत् देशस्य सामाजिकी आर्थिकी प्रगतिः च शिक्षायाः ऊपरि निर्भराः। अतः शिक्षा सर्वेषां प्राणिनां कृते वर्त्तते। तस्य शिक्षित समाजस्य परिकल्पना आसीत्। कार्यक्रमस्य भूमिका अतिथिपरिचयः च विभागसमन्वयकेन डॉ. तुलसी दासपरोहामहोदयेन प्रस्तुतम्। कार्यक्रमसंयोजकः आसीत् डॉ. अजय राठी। सत्यस्यप्रयोगः पुस्तकस्य अंशवाचनं डॉ. पूजा कृतवती तथा च छात्राः गान्धीवर्यस्य प्रिय भजनानां गायनं कृतवन्तः। कार्यक्रमे डॉ. पूजा उपाध्याय, डॉ. अखिलेशकुमारद्विवेदी, डॉ. शुभमशर्मा, सर्वे शिक्षकाः छात्राःच उपस्थिता आसन्। कार्यक्रमस्य संचालनं ईशापाटीदारेण आभारप्रदर्शनं च अभिषेकगौतमेन कृतम्। कल्याण मन्त्रेण सह सभा विसर्जिता।

## श्री परशुराम-चतुर्वेद विद्यालये संस्कृतभारती देहरादून द्वारा आयोजितं सरलसंस्कृत सम्भाषण-शिविरं सम्पन्नम्

देहरादूनमहानगरे संस्कृतस्य प्रचार-प्रसाराभियानस्य अंतर्गते प्रधानाचार्यस्य श्री भरतरामतिवारिणः प्रेरणया श्री चतुर्वेदविद्यालये आयोजितं सरलसंस्कृत सम्भाषणशिविरस्य समापने सत्राध्यक्षरूपेण समागतः विद्यालयस्य संस्थापकः , वैदिक ब्राह्मणमहासभायाः अध्यक्षः आचार्यश्रीपवनशर्मा वेदवाणीं संस्कृतं सांस्कृतिकन्यासम् इति उक्तवान। सः संस्कृतस्य प्रचारार्थं संस्कृतभारती द्वारा विहितान् प्रयत्नान् मुक्तकंठेन प्रशंसितवान् । अथ च निश्चित् अंतराले शिविरस्य आयोजनाय निवेदनं कृतवान।

सत्रसंयोजकः व्याकरणाचार्यः श्री भगवतीप्रसादथपलियालः संस्कृतस्य ध्वनिविज्ञानस्य विशेषतां प्रकाशितवान् । सः शास्त्रसंरक्षणपरस्परायां संस्कृतस्य व्यावहारिकतायाः महत्वं प्रतिपादितवान् ।

शिविरसंचालकः महानगरसंपर्कप्रमुखः धीरजमैठाणी शिविरस्य इतिवृत्तं प्रस्तूयमानः छात्राणां सहभागितां समुल्लिखितवान। संस्कृत भारतीसंघठनस्य विषये च सविस्तरं उक्तवान।

विद्यालयकुटुम्बतः प्रधानाचार्यः श्री भरतरामतिवारी ,आंग्ल विषयाध्यापकः भाषाचार्यः श्री दीपकबहुगुणा, साहित्याचार्यः श्री दुर्गेशभट्टः, वेदाचार्यः श्री अमनतिवाड़ी कालियाप्रसादतिवाडी च संस्कृतस्य व्यावहारिकतां स्वीकृत्य स्वविचारान् उपस्थापयित्वा छात्रान् प्रेरितवान् ।

प्रतिभागिच्छात्रेषु मञ्चसञ्चालनम् आरुषशर्मा शिविरगतम् अनुभवं - रुद्रांशउनियालः, कार्तिकदेवरानी, उद्देश्यगीतम् अर्जितनारायणउनियालः, संख्यावाचनम् अनन्त-बहुगुणा, अभिनयगीतं मोहितचन्द्रजोशी, एकलगीतं रामचन्द्रजोशी स्वागतगीतं अच्युत-खूडी अंशसेमवालः च कृतवान।

अस्मिन् अवसरे विभागसंयोजकः नागेंद्रदत्तव्यासः, सहसंयोजकः डॉ नवीन-जसोला, जनपदमंत्री प्रदीपसेमवालः, महानगरमंत्री माधवपौडेलः, खंड-संयोजकः धीरजबिष्टः, डॉ महेशचंद्र मासीवालः, राधाकृष्णवैदिकः इत्यादयः कार्यकर्तारः शुभाशंसनं प्रकटितवन्तः ।



# विजयादशमीपर्वणि गुरुकुलप्रभाताश्रमे सौप्रस्थानिकसमारोहः सम्पन्नः

मेरठनगरे। विजयादशमीपर्व प्रभुश्रीरामस्य विजयेनदुष्टेषु भद्रतायाः, भ्रष्टाचरणे सत्याचरणस्य, अन्ध तमसि प्रकाशस्य विजयं द्योतयति। एतद्वर्षे विजयपर्वणः शुभावसरेमयराष्ट्रस्थिते गुरुकुलप्रभाताश्रमे



दीक्षान्तसमारोहस्य आयोजनमभवत। विद्याक्षेत्रे विजयप्राप्तौ गुरुकुलस्य कुलाधिपतीनां चतुर्दशविद्याभूत-चतुर्दशरत्नरूपिणांविद्यार्थिनाम् अधिगमस्य सम्पूर्तौ दीक्षान्तरूपसौप्रस्थानिकसमारोहः सम्पन्नः। एतस्मिन् विशिष्टावसरे एन.सी.ई.आर.टी.इत्यत्र शिक्षासम्बद्धासुविविधयोजनासु कार्यं कृतवान् प्रो. विजयपालवर्यः मुख्यातिथित्वेन उपस्थितः। उत्तरप्रदेशसंस्कृतसंस्थानस्य अध्यक्षचरः, गुरुकुलप्रभाताश्रमस्य महामन्त्री मेरठमहाविद्यालयस्य च प्रो.वाचस्पतिमिश्रवर्योविशिष्टातिथित्वेन उपातिष्ठत्। उभावपि महनीयौ महानुभावौ चतुर्दशाभिनवस्नातकेभ्यःभाविभविष्याय सदुपदेशान् प्रादाताम्।अथापिगुरुकुलस्यैव वरिष्ठस्नातको वर्त्तमानेबड़ौतस्थितस्य जनतावैदिकमहाविद्यालयस्य प्राचार्योडा.यशपालशास्त्रिवर्यो गुरुकुलस्य सिद्धान्तवचनपरम्परासंरक्षितुंतदीयानुवचनानि स्मारयन्,तत्प्रवचनम् अकारयत्।

वेदमर्मवेत्तारो गुरुकुलस्य कुलाधिपतिवर्याः, परमपूज्यगुरवो विद्यार्थिभ्योऽभिनवस्नातकेभ्यः, समस्तस्नातकेभ्यश्चउपदेशान् प्रादुः यद्येन प्रकारेण निर्माण्यां समाजाय वस्तूनि विधीयन्ते, तेन प्रकारेण



शिक्षणसंस्थासुसद्विद्याभिः विद्यार्थित्वेन समाजाय मानवाः विधीयन्ते। अतोयदाप्रभृति गुरुकुलाद् बहिर्गमिष्यन्ति,तदा भवत्सु प्रत्येकं विद्यार्थी एकैकशः प्रभाताश्रमत्वेन तत्र-तत्र स्थानेषु वर्त्तिष्यते। अतस्सर्वैरेतन्मर्यादा सदाअवधेया। तैर्गुरुभिरागामिजीवनपाथेयत्वेनोपदिष्टम्, यत् संस्कृतरक्षासंस्कृतिरक्षा, वेदरक्षा राष्ट्ररक्षा चेतिलक्ष्यं लक्ष्यीकृत्य समाजेअग्रेसरणीयम्, सुचरितानि सर्वत्र सारणीयानीति। सौप्रस्थानिकसमारोहस्य शुभवेलायां मयराष्ट्रार्यसमाजस्य मन्त्री राजेशसेठीवर्यः, अशोकसुधाकरवर्यः, तत्प्रतिनिधयः, गुरुकुलस्य च स्नातकवृन्दं समेत्य अन्ये गणमान्यजनाः उपस्थिताः, यैर्दीक्षार्थिभ्योभाविसमुज्ज्वलभविष्यायशुभकामनाः प्रकाशिताः।










अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः

परामर्शकाः-डॉ.बलदेवानन्दसागरः, प्रो. वाचस्पति मिश्रः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी,

सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।

दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।